# Rajni Stotram

# રાજ્ઞીસ્તોત્રમ્

## Document Information

Text title : Rajni Stotram 2

File name : rAjnIstotram2.itx

Category : devii, dashamahAvidyA

Location : doc_devii

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : September 29, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 29, 2019

*sanskritdocuments.org*

# Rajni Stotram

# રાજ્ઞીસ્તોત્રમ્

ઓઙ્કારરૂપેઽખિલવેદસારે વેદાન્તવિજ્ઞાનચણૈઃ પ્રગીતે ।
મૂર્ધ્ના મહારાજ્ઞિ મહાર્હપીઠે વન્દે ત્વદીયં ચરણારવિન્દમ્ ॥ ૧॥

ભૂરાદિલોકે કૃતલક્ષણેઽજે રાજ્ઞિ પ્રપન્નાર્તિહરે નમસ્તે ।
આક્રન્દમાકર્ણય મે શરણ્યે ભક્તાર્તિનાશે હ્યપરઃ પ્રભુઃ કઃ ॥ ૨॥

ભુવોઽવકાશે રવિચન્દ્રદીપ્તિર્દેદીપ્યતે ત્વામનુ ચિત્પ્રદીપ્તિમ્ ।
તમઃપ્રપઞ્ચં પ્રવિલાપ્ય હાર્દં પદ્મં મમાબોધય રાજ્ઞિ માતઃ ॥ ૩॥

સ્વઃશાખિદર્પં હરતીષ્ટદાનાદાશાધિકાદ્યત્સ્મૃતમાત્રમેવ ।
માતર્મહારાજ્ઞિ તદાનનં તે વન્દે શરત્સુન્દરચન્દ્રરમ્યમ્ ॥ ૪॥

તદ્વાઙ્મનોદૂરમચિન્તનીયં રૂપં સ્વકીયં ભવદુઃખહારિ ।
પીયૂષપીયૂષમયૂખતુલ્યં રાજ્ઞિ પ્રકાશ્યામ્બ કદા દયેથાઃ ॥ ૫॥

સવિતુઃ શક્તિભૂતા ત્વં સૂયસેઽદશ્ચરાચરમ્ ।
નમોઽસ્તુ તે મહારાજ્ઞિ પાહિ માં શરણાગતમ્ ॥ ૬॥

વરેણ્યં ત્વત્પદાભ્યર્ચામૃતચર્વણમસ્તુ મે ।
નમોઽસ્તુ તે મહારાજ્ઞિ પાહિ માં શરણાગતમ્ ॥ ૭॥

ભર્ગો ભર્ગેઽપિ સંસારભર્જકો યસ્તવૈવ સઃ ।
નમોઽસ્તુ તે મહારાજ્ઞિ પાહિ માં શરણાગતમ્ ॥ ૮॥

દેવસ્ય ત્રિપુરારાતેરાહોપુરુષિકે શિવે ।
નમોઽસ્તુ તે મહારાજ્ઞિ પાહિ માં શરણાગતમ્ ॥ ૯॥

ધીમહિમ્નાપિ કેનાપિ યાં સ્તોતું ન પ્રભૂયતે ।
નમોઽસ્તુ તે મહારાજ્ઞિ પાહિ માં શરણાગતમ્ ॥ ૧૦॥

ધિયો મે ઘોરસંસારલઙ્ઘને સન્તુ સજ્જિતાઃ ।
નમોઽસ્તુ તે મહારાજ્ઞિ પાહિ માં શરણાગતમ્ ॥ ૧૧॥

યોઽર્ચતિ ત્વાં સ દેવેશિ મઘવાદિભિરર્ચ્યતે ।
નમોઽસ્તુ તે મહારાજ્ઞિ પાહિ માં શરણાગતમ્ ॥ ૧૨॥

નસ્તિતોષ્ટ્રવદમ્બાહં કર્મપાશૈઃ પ્રપીડિતઃ ।
નમોઽસ્તુ તે મહારાજ્ઞિ પાહિ માં શરણાગતમ્ ॥ ૧૩॥

પ્રચોદયાત્તવેચ્છા માં તવૈવાઙ્ઘ્રિનિષેવણે ।
નમોઽસ્તુ તે મહારાજ્ઞિ પાહિ માં શરણાગતમ્ ॥ ૧૪॥

માતુઃ સ્નેહઃ સર્વપુત્રેષુ તુલ્યઃ શ્લાઘ્યાશ્લાઘ્યેષ્વમ્બ ચેત્સત્યમેતત્ ।
દુર્વૃત્તસ્યાપ્યાત્મજસ્યાસ્તિ કિં મે ત્યાગો યુક્તોઽયુક્તદોષૌઘહર્ત્રિ ॥ ૧૫॥

રાજ્ઞીસ્તોત્રમિદં પુણ્યં યઃ પઠેદ્ભક્તિસંયુતઃ ।
તસ્ય સિધ્યતિ સર્વેષ્ટમચિરાદ્દેવ દુર્લભમ્ ॥ ૧૬॥

ઇતિ શ્રીરાજ્ઞીસ્તોત્રં સમાપ્તમનાથક્ષેમાય ભવતુ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Rajni Stotram*

pdf was typeset on September 29, 2019

Please send corrections to *sanskrit@cheerful.com*